गोष्पदं द्विखुरं ज्ञेयं तदा ह्यङ्गुलमानतः ।
त्रिकोणाधस्तु निर्द्दिष्टमथवा कलसो यथा ॥
श्रीनारद उवाच ।
न श्रुतं न च दृष्टञ्च चिह्नमेतन्मयोदितम् ।
कथं वै सदृशं ब्रह्मन् वद त्वं साम्प्रतं मम ॥
श्रीब्रह्मोवाच ।
पताका च ध्वजा प्रोक्ता प्रान्ते त्रैलोक्यकाशय: ।
पद्मं वै बाह्यपत्रञ्च ज्ञातव्यं श्रुतिनोदितम् ॥
वज्रं खण्ड इति प्रोक्तं दृष्टं वै गोत्रभित्करे ।
सहस्रारं समाख्यातं क्वचिद्वेदविदो विदुः ॥
अङ्कुशो नागशिच्चास्त्रं निर्म्मितं यद्धि पुत्रक ।
तादृशं तद्धवेच्चिह्नं विज्ञेयं वैष्णवैर्नरैः ॥
यवोऽप्यङ्गुष्ठमूलेषु कथितो मुनिभिर्ध्रुवम् ।
आतपत्रं नृपच्छत्राकारं वत्स सुशोभनम् ॥
चक्रं सुदर्शनाकारं यच्चिह्नं तन्मनोहरम् ।
वासुदेवकरे यद्वत् मुनिभिः परिकीर्त्तितम् ॥
विवाहादौ च माङ्गल्ये पुत्रे जाते तथैव च ।
स्त्रीभिश्चैव सदा कार्य्यं स्वस्तिकञ्च तदुच्यते ॥
रेखाश्चतस्रः संख्यातास्तिर्य्यगूर्द्ध्वा यदीच्चिताः ।
पल्लवेन च संयुक्तमष्टकोणं तदुच्यते ॥
दण्डाकारोर्द्ध्वरेखा स्यात् न वक्रा दृश्यते यदा ।
मध्यमाङ्गुष्ठमानेन कथिता मुनिभिः किल ॥
दशभिश्चिह्नितैः पादं वन्द्यं पूज्यञ्च सर्व्वदा ।
चिह्नान्येतानि भो विप्र दक्षिणे चरणे विभोः ।
स श्रीकृष्ण इति ज्ञेयो बुद्धिमद्भिर्नरोत्तमैः ॥*॥
यद्रूपाणि च चिह्नानि वामपादे च तत् शृणु ॥
इन्द्रचापं धनुर्व्विद्यात् द्व्यङ्गुलञ्च चतुर्गुणम् ।
मौर्व्वीसंयुक्तवक्रं चेत्तदाहुर्मुनयो ध्रुवम् ॥
त्रिकोणन्तु त्रिरेखाख्यं शकटाकारकं यदा ।
तदा वै तत्त्रिकोणाख्यं चिह्नन्तु मुनिनोदितम् ॥
कलसो वर्त्तुलाकारो ग्रीवया सहितो यदा ।
दृश्यते तादृशं पुत्र चिह्नितं सकलाधिकम् ॥
द्वितीयायां यथा चन्द्रो दृश्यते चाम्बरे क्वचित् ।
तद्वद्वै चन्द्रं विज्ञेयं श्रुतौ च प्रतिपादितम् ॥
अम्बरं बिन्दूरित्येवं द्विरेखासुसमन्वितम् ।
वर्त्तुलञ्च सदा दृष्टं श्रीकृष्णे परमात्मनि ।
मत्स्याकारो भवेद्यत्र तच्चिह्नं मत्स्यसंज्ञकम् ।
जम्बूफलसमाकारं जम्बूचिह्नं विदुर्बुधाः ॥
एतच्चिह्नं समाख्यातमूनविंशतिसंख्यकम् ।
पादयोरुभयोराहुः कृष्णस्य मुनयोऽनघाः ॥७॥
एवं वृन्दावनेश्वर्य्याः पादयोर्म्मुनिसत्तम ! ।
ऊनविंशतिचिह्नानि कथयामीह तत् शृणु ॥
दक्षिणे नव चिह्नानि राधाया दश वामतः ।
भेदोऽयं कथितो विप्र कृष्णस्यार्द्धाङ्गरूपिणी ॥
एतानि पदचिह्नानि दृष्टानि च श्रुतानि च ।
त्वदग्रे कथितान्येव पुनः किं कथयाम्यहम् ॥
नारद उवाच ।
चिह्नान्येतानि भो ब्रह्मन् किं कर्त्तव्यानि वैष्णवैः ।
कथयस्व हि सर्व्वज्ञ युगयोः पादयोर्म्मम ॥
ब्रह्मोवाच ।
सौवर्णं राजतं वापि पाषाणं काष्ठजादिकम् ।
युगलं युगलं पादं कृत्वा चिह्नैश्च चिह्नितम् ॥
स्वगात्रे विन्यस्तानि पदचिह्नानि वैष्णवः ।
नाभेरूर्द्ध्वं मुनिः स्नात्वा वत्स वृन्दावनेशयोः ॥
अथवा चिह्नितं पादं कृत्वा भागवतोत्तम ! ।
पूजामारभते तावत् यावज्जीवति नारद ! ॥
पूजितो देवदेवेशः फलं भवति देहिनाम् ।
तथा तच्चिह्नितं पादं अर्च्चनं कुरुते यदि ॥
राजसूयाश्वमेधादिफलं भवति सर्व्वथा ।
तदनन्तगुणं प्रोक्तं यद्येकं पूजयेत् सुधीः ॥"
इति पाद्मोत्तरखण्डे श्रीकृष्णपदचिह्नमाहात्म्यं नाम ११२ अध्यायः ॥*॥ तन्नाममाहात्म्यं यथा,
श्रीसदाशिव उवाच
"शृणु नारद ! भद्रं ते कथयिष्यामि चानघ ।
पार्व्वत्यै यदहं पृष्टः प्रावोचन्तु यथातथम् ॥
वेदस्याध्ययनं यज्ञं तपो योगः शमो दमः ।
कृष्णनामसहस्रांशैर्देवर्षे ! नहि तुल्यकम् ॥
ज्ञानं देवार्च्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनामसमं न च ॥
गोविन्दनामसदृशं न त्यागो न व्रतं मुने ! ।
न मङ्गल्यो नापि शौचं न पुण्यं न फलं तथा ॥
वानप्रस्थं ब्रह्मचर्य्यं गार्हस्थ्यं कर्म्मन्यासकम् ।
धर्म्म एव सदाचारो न हरेर्नामतुल्यकः ॥
न हरेर्नामसदृशं कर्म्म किञ्चित् तपस्तथा ।
सर्व्वतीर्थाटनञ्चैव चतुर्द्धा मुक्तिरेव च ॥
कृष्णनाम परा मुक्तिः कृष्णनाम परा गतिः ।
कृष्णनाम परं पुण्यं कृष्णनाम परं फलम् ॥
कृष्णनाम परो धर्म्मः कृष्णनाम परं तपः ।
कृष्णनाम परा शान्तिः कृष्णनाम परा स्तुतिः ॥
कृष्णनाम परा भक्तिः कृष्णनाम परा स्मृतिः ।
कृष्णनाम परं यज्ञं कृष्णनाम परा मतिः ॥
कृष्णनाम परं ज्ञानं कृष्णनाम परा स्थितिः ।
कृष्णनाम परं दानं कृष्णनाम जगत्प्रियम् ॥
कृष्णनाम परं श्राद्धं पितॄणां तर्पणं सदा ।
कृष्णनाम परा प्रीतिः कृष्णनाम परः प्रभुः ॥
कृष्णनाम जगत् सत्यं जन्तूनां कारणं परम् ।
जीवनं शरणं कृष्णनामैव विपुलं धनम् ॥
कृष्णनाम जगद्वन्धुर्ज्जगद्वीजं गुणः परः ।
विश्वधारं कृष्णनाम जगतां पावनं परम् ॥
कृष्णनाम जगज्जन्म यत् किञ्चित् सचराचरम् ।
धार्य्यते पाल्यते विश्वं कृष्णनाम्ना प्रलीयते ॥
यत् किञ्चित् क्रियते कर्म्म कृष्णनाम परायणः ।
तत् कर्म्म कर्म्म एव स्यात् साक्षाद्गृह्णाति केशवः ॥
श्रीहरेर्नाम ग्रहणं प्रशस्तञ्च युगे युगे ।
कुत्रापि न भवेत् सिद्धिर्हित्वा तन्नाम कर्म्म च ॥
विशेषतः कलियुगे कृष्णनामैव केवलम् ।
त्यक्ता नास्त्येव देवर्षे ! लोकस्य गतिरन्यथा ॥
हरिनामपरः शान्तः क्षमाशीलो जितेन्द्रियः ।
नीत्वा कुलसहस्राणि कृष्णं प्राप्नोति स्वानि च ॥
श्रीकृष्णहरिगोविन्ददासनामादिको जनः ।
यः कश्चिद्याति कलुषं सर्व्वं तन्नामकीर्त्तनात् ॥
हत्यायुतं पानसहस्रमुग्रं
गुर्व्वङ्गनाकोटिनिषेवणञ्च ।
स्तेयान्यनेकानि हरेः प्रियेण
गोविन्दनाम्ना निहतानि सद्यः ॥
यदृच्छयापि दहति स्पृष्टो हुतवहो यथा ।
हरिनाम दहेत् पापं तथास्यमुखनिर्गतम् ॥
सकृदुच्चारितं येन हरे कृष्णेति निश्चयम् ।
यमाधिकारं नो याति कालेन विना मुने ॥
अज्ञानादथवा ज्ञानाद्दस्युभावेन वा पुनः ।
कृष्णनामैव यच्चिन्ता स याति परमं पदम् ॥
ब्रह्महा मद्यपः स्तेयी ह्यज्ञानाद्गुरुतल्पगः ।
भवार्णवं तरेदन्ते कृष्णनामपरायणः ॥
पितृहा नृपहा गोघ्नः स्त्रीहन्ता पापिनोऽपरे ।
गोविन्दनामोच्चारेण पश्चात्ते शुद्धिमाप्नुयुः ॥
यद्भूतं पापमज्ञानाद्वर्त्तमानञ्च नारद ।
यद्भविष्यति तत् सर्व्वं कृष्णनाम दहेद्ध्रुवम् ॥
जीवानान्तु सदा द्रोही चात्महा निन्द्यकर्म्मकृत् ।
स पूतो जायते धन्यो नामकीर्त्तनतो हरेः ॥
क्षेत्रतीर्थतपोदानव्रतार्च्चनं फलं तथा ।
शक्तिश्च सर्व्वयज्ञानां मुक्तेरध्यात्मवस्तुनः ॥
ज्ञानञ्च देवमहतां सर्व्वसिद्धिप्रदं फलम् ।
नैमित्तिकानां नित्यानां तथा च काम्यकर्म्मणाम् ॥
वर्णाश्रमानां योगानां स्थापितं येषु नामसु ।
आकृष्य सर्व्वाघहरं पुरा कृष्णेन नारद ॥
त्रैलोक्ये यानि पुण्यानि धर्म्मकर्म्मफलानि च ।
तुल्यतां तानि नो यान्ति हरिनामानुकीर्त्तने ॥
नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः ।
तावत् कर्त्तुं न शक्नोति पातकं पातकी जनः ।
श्वपचो वृजिनं कर्त्तुं नहि शक्नोति यत्नतः ॥
तावद्वर्त्तुं मुने यावत् कृष्णनामानुकीर्त्तनम् ।
मानसं कर्म्मजं वाग्जं लोके तन्नास्ति कल्मषम् ।
सर्व्वाशुभघ्नं शिवदं यद्धरेर्नामकीर्त्तनम् ।
चान्द्रायणादिभिः कृच्छ्रैः शुद्धिर्न स्यात्तथा नृणाम् ॥
कीर्त्तनेन हरेर्नाम्नः सकृदेव भवेद्यथा ।
सकृदाख्यातं येन कृष्णनाम सुमङ्गलम् ।
तज्जिह्वा वैष्णवी नान्यं वचो वक्तुमप्यकारणम् ॥
ऋग्वेदो हि यजुर्व्वेदः सामवेदोऽप्यथर्व्वणम् ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
पापिनोऽपि हरेर्नाम कीर्त्तयन्ति यथा यथा ।
सर्व्वाघं भस्मसात् कृत्वा कृष्णभक्तिस्तथा तथा ॥
सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति नारद ! ॥
पुराणशास्त्रागमवेदपाठ-
तीर्थावगाहादिफलं यथेष्टम् ।
गोविन्दनाम्नोऽपि कलाशतांशे-
स्तुल्यं भवेन्नैव मुने कदाचित् ॥
मा ऋचो मा यजुर्व्विप्र न साम पठ किञ्चन ।
कृष्णगोविन्दनामादि गेयं गायस्व नित्यशः ॥
गोकोटिदाने ग्रहणे खगस्य
प्रयागगङ्गाम्बुनि कल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं
गोविन्दनाम्नो न समं शतांशैः ॥